# संस्कृतम्
## विषय-कोड्-सङ्ख्या - 122
## कक्षा – नवमी (2025-26)
## पाठ्यक्रमः परीक्षानिर्देशाश्च

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, मानवः स्वमनसि विद्यमानान् विचारान् भावनाः अनुभूतिं च अर्थयुक्तैः ध्वनिभिः लिखितसङ्केतैः च व्यक्तीकरोति सा भाषा। भाषा अभिप्रायप्रकटनस्य साधनम्। वस्तुतः लोके द्वयोः मनुष्ययोः मध्ये परस्परम् अवबोधनाय, भावग्रहणाय, भावविनिमयाय च भाषया विना न अन्यत् स्पष्टतमं सरलतमं च साधनं विद्यते। लोके बहव्यः भाषाः सन्ति यासु संस्कृतभाषा अतिप्राचीनतमा समृद्धा च अस्ति। संस्कृतभाषायाम् एव सन्ति ऋग्यजुस्सामाथर्वाः चत्वारः वेदाः, शिक्षा, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दः कल्पः चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, योगशास्त्रादयः ग्रन्थाः। अतः संस्कृतं केवलं भाषा न अपितु किञ्चन जीवनदर्शनम् इति। इयं विद्या (भाषा) भारतीयानां प्रतिष्ठात्मिका कामधेनुः समस्तज्ञानप्रदात्री, ऐक्यप्रदात्री, धर्मार्थकाममोक्षप्रदात्री च अस्ति। सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वं अस्यां भाषायामेव सन्निहितम् अस्ति। अतिसूक्ष्मभावनां प्रकटयितुं स्पष्टीकर्तुं संस्कृतं विना नैव अन्यत्र विद्यते सामर्थ्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्त्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकानां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीव वैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। सर्वासु भारतीयभाषासु संस्कृतभाषा अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च -

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥
संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि –**

* वसुधैव-कुटुम्बकम् इति भावनाविकासः।

* भारतीयभाषाणां संरक्षणम्।
* संस्कृतभाषया सम्प्रेषणकौशलविकासः।
* परस्परं संस्कृतसम्भाषणेन भावविनिमयः।
* संस्कृत-भाषया एव संस्कृत-शिक्षणम्।
* श्रवण-भाषण-पठन-लेखनेति चतुर्णां भाषिक-कौशलानां विकासः।
* बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानम्।
* मानसिकविकासानन्दानुभूतिः रसानुभूतिश्च।
* भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
* आत्मानुशासनसंस्थापनार्थम्
* भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
* परस्परं वार्तालापमाध्यमेन भावविनिमयः।
* संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
* मानवजीवनस्य विकासपूर्वकं कल्याणम्।
* संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः -**

* संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृतशिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकैः धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
* विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
* संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
* विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
* भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
* अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
* प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

* **श्रवणकौशलम्** – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि- गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादीनि।
* **भाषणकौशलम्**- भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
* **पठनकौशलम्** – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
* **लेखनकौशलम्**- भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)
* ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।

# संस्कृतम्

## विषय-कोड्-सङ्ख्या - 122

## कक्षा - नवमी (2025-26)

आहत्याङ्काः – 80+20

**वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे चत्वारः खण्डाः भविष्यन्ति –**

| | | |
|---|---|---|
| **'क' खण्डः** | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख' खण्डः** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' खण्डः** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ' खण्डः** | **पठितावबोधनम्** | **30 अङ्काः** |

**खण्डानुसारं विषयाः मूल्यभारः च**

| क्र. सं. | विषयाः | प्रश्नप्रकाराः | मूल्यभारः |
|---|---|---|---|
| **'क' खण्डः<br>अपठितावबोधनम्** | | | **10 अङ्काः** |
| 1. | एकः गद्यांशः (80-100 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम् (लघूत्तरात्मकः)<br>भाषिककार्यम् (बहुविकल्पात्मकाः) | 2×1=2<br>2×2=4<br>1×1=1<br>3×1=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| **'ख' खण्डः<br>रचनात्मककार्यम्** | | | **15 अङ्काः** |
| 2. | औपचारिकम् अथवा अनौपचारिकं पत्रम् (पूर्णं पत्रं लेखनीयम्) | निबन्धात्मकः | 5 |
| 3. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | पूर्णवाक्यात्मकाः / निबन्धात्मकः | 5 |
| 4. | हिन्दी/आङ्ग्लभाषातः संस्कृतेन अनुवादः | पूर्णवाक्यात्मकः | 5×1=5 |
| | | **पूर्णभारः** | **15 अङ्काः** |
| **'ग' खण्डः<br>अनुप्रयुक्तव्याकरणम्** | | | **25 अङ्काः** |
| 5. | सन्धिः | लघूत्तरात्मकाः | 4×1=4 |
| 6. | शब्दरूपाणि | बहुविकल्पात्मकाः | 4×1=4 |
| 7. | धातुरूपाणि | बहुविकल्पात्मकाः | 4×1=4 |
| 8. | कारक-उपपदविभक्तयः | बहुविकल्पात्मकाः | 4×1=4 |
| 9. | प्रत्ययाः | बहुविकल्पात्मकाः | 3×1=3 |
| 10. | सङ्ख्याः | लघूत्तरात्मकाः | 4×½=2 |
| 11. | उपसर्गाः | लघूत्तरात्मकाः | 4×½=2 |
| 12. | अव्ययानि | बहुविकल्पात्मकौ | 2×1=2 |

| | | | |
|---|---|---|---|
| | | **पूर्णभारः** | **25 अङ्काः** |
| **‘घ’ खण्डः**<br>**पठितावबोधनम्** | | | **30 अङ्काः** |
| 13. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 14. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 15. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 16. | प्रश्ननिर्माणम् | पूर्णवाक्यात्मकाः | 4×1=4 |
| 17. | अन्वयः अथवा भावार्थः | निबन्धात्मकः | 3 |
| 18. | घटनाक्रमानुसारं वाक्यलेखनम् | निबन्धात्मकः | 8×½=4 |
| 19. | (क) प्रसङ्गानुसारम् अर्थस्य लेखनम्<br>(ख) शब्दानाम् अर्थैः सह मेलनम् | लघूत्तरात्मकाः<br>लघूत्तरात्मकाः | 4×½=2<br>4×½=2 |
| | | **पूर्णभारः** | **30 अङ्काः** |

**सम्पूर्णभारः 80 अङ्काः**

## प्रश्नपत्र-प्रारूपम् / संरचना
## संस्कृतम्
## विषय-कोड्-सङ्ख्या - 122
## कक्षा - नवमी (2025-26)

| प्रश्नप्रकारः | प्रश्नानां सङ्ख्या | विभाग-सङ्ख्या | प्रतिप्रश्नम् अङ्कभारः | आहत्याङ्काः |
|---|---|---|---|---|
| अति-लघूत्तरात्मकाः ½ अङ्कः | 2+2+2=6 | 3 | ½ | 3 |
| अति-लघूत्तरात्मकाः 1 अङ्कः | 2=2 | 1 | 1 | 2 |
| बहुविकल्पात्मकाः 1 अङ्कः | 3+4+4+4+3=18 | 5 | 1 | 18 |
| लघूत्तरात्मकाः ½ अङ्कः | 4+4+4+4+4=20 | 5 | ½ | 10 |
| लघूत्तरात्मकाः 1 अङ्कः | 2+2+2+1+4=11 | 5 | 1 | 11 |
| दीर्घोत्तरात्मकाः ½ अङ्कः | 8=8 | 1 | ½ | 4 |
| दीर्घोत्तरात्मकाः 1 अङ्कः | 5+5+2+2+2+4=20 | 6 | 1 | 20 |
| दीर्घोत्तरात्मकाः 2 अङ्कौ | 2=2 | 1 | 2 | 4 |
| निबन्धात्मकाः 3 अङ्काः | 1=1 | 1 | 3 | 3 |
| निबन्धात्मकाः 5 अङ्काः | 1=1 | 1 | 5 | 5 |
| | | | **आहत्याङ्काः** | **80** |

# संस्कृतम्

## विषय-कोड्-सङ्ख्या - 122

## कक्षा-नवमी (2025-26)

## वार्षिकं मूल्याङ्कनम्

| | |
|---|---|
| **'क' खण्डः**<br>**अपठितावबोधनम्** | **(10 अङ्काः)** |
| 1. एकः अपठितः गद्यांशः<br>80-100 शब्दपरिमितः गद्यांशः, सरलकथा वर्णनं वा<br>➢ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)<br>➢ शीर्षकलेखनम् (1)<br>➢ अनुच्छेदाधारितं भाषिकं कार्यम् (3)<br>भाषिककार्याय तत्त्वानि -<br>✓ वाक्ये कर्तृ-क्रियापदचयनम्<br>✓ कर्तृ-क्रिया-अन्वितिः<br>✓ विशेषण-विशेष्यचयनम्<br>✓ पर्याय-विलोमपदचयनम्<br>✓ सर्वनामस्थाने संज्ञाप्रयोगः | **10** |
| **'ख' खण्डः**<br>**रचनात्मककार्यम्** | **(15 अङ्काः)** |
| 2. औपचारिकम् अथवा अनौपचारिकं पूर्णपत्रलेखनम्<br>सम्भावितविषयाः –<br>➢ औपचारिकम् -<br>अवकाशार्थम्, स्वच्छतायै स्वास्थ्यविभागाय, विद्युद्विभागाय, वित्तकोषाय, आरक्षकालयाय, प्रकाशकाय इत्यादयः।<br>➢ अनौपचारिकम् -<br>पितृभ्याम्, वर्धापनपत्रम्, निमन्त्रणपत्रम्, परिणामसूचनापत्रम् इत्यादयः। | 5 |
| 3. चित्राधारितं वर्णनम् अथवा अनुच्छेदलेखनम्<br>(मञ्जूषायाः सहायतया चित्रवर्णनम् अनुच्छेदलेखनं वा करणीयम्) | 5 |
| 4. हिन्दीभाषायाम् आङ्ग्लभाषायां वा लिखितानां पञ्चवाक्यानां संस्कृतभाषायाम् अनुवादः | 5 |
| **'ग' खण्डः**<br>**अनुप्रयुक्तव्याकरणम्** | **(25 अङ्काः)** |
| 5. सन्धिकार्यम्<br>➢ स्वरसन्धिः - दीर्घः, गुण, वृद्धिः, यण्, अयादि<br>➢ व्यञ्जनसन्धिः –जश्त्वसन्धिः, 'म्' स्थाने अनुस्वारः | 4 |

| | |
|---|---|
| ➢ विसर्गसन्धिः – उत्वम्, रत्वम्, लोपः<br>6. शब्दरूपाणि<br>➢ अकारान्तपुँल्लिङ्गशब्दाः – बालकवत्<br>➢ इकारान्तपुँल्लिङ्गशब्दाः – कविवत्<br>➢ उकारान्तपुँल्लिङ्गशब्दाः – साधुवत्<br>➢ ऋकारान्तपुँल्लिङ्गशब्दाः – पितृवत्<br>➢ आकारान्तस्त्रीलिङ्गशब्दाः - लतावत्<br>➢ ईकारान्तस्त्रीलिङ्गशब्दाः – नदीवत्<br>➢ ऋकारान्तस्त्रीलिङ्गशब्दाः – मातृवत्<br>➢ हलन्ताः - राजन्, भवत्, विद्वस्, गुणिन्<br>➢ सर्वनामशब्दाः – अस्मद्, युष्मद्, तत्, इदम्, किम् (त्रिषु लिङ्गेषु) | 4 |
| 7. धातुरूपाणि<br>➢ पठ्, गम्, वद्, भू, क्रीड्, नी, दृश्, शक्, ज्ञा, अस्, कृ, दा, क्री, श्रु, पा (पिब्), सेव्, लभ्, रुच् (पञ्चसु लकारेषु) | 4 |
| 8. कारक-उपपद-विभक्तयः<br>➢ द्वितीया – उभयतः, धिक्, परितः, समया, निकषा, प्रति, विना<br>➢ तृतीया – सह, साकम्, समम्, सार्धम्, विना, अलम्, सदृश, हीन<br>➢ चतुर्थी – रुच्, दा (यच्छ्), नमः, कुप्, स्वस्ति<br>➢ पञ्चमी – विना, बहिः, भी, रक्ष्, ऋते<br>➢ षष्ठी – उपरि, अधः, पुरतः, पृष्ठतः, निर्धारणे<br>➢ सप्तमी- स्निह्, निपुणः, विश्वस्, पटु | 4 |
| 9. प्रत्ययाः<br>➢ क्त्वा, तुमुन्, ल्यप्, क्तवतु, शतृ, शानच्, क्त | 3 |
| 10. सङ्ख्या – 1-100 (1-4 केवलं प्रथमा-विभक्तौ) | 2 |
| 11. उपसर्गाः (द्वाविंशतिः) | 2 |
| 12. अव्ययानि<br>➢ स्थानबोधकानि – अत्र, तत्र, अन्यत्र, सर्वत्र, यत्र, एकत्र, उभयत्र<br>➢ कालबोधकानि – यदा, तदा, सर्वदा, एकदा, पुरा, अधुना, अद्य, श्वः, ह्यः<br>➢ प्रश्नबोधकानि – किम्, कुत्र, कति, कदा, कुतः, कथम्, किमर्थम्<br>➢ अन्यानि – च, अपि, यदि, तर्हि, यथा, तथा, सम्यक्, एव, तु | 2 |
| **'घ' खण्डः**<br>**पठितावबोधनम्** | **(30 अङ्काः)** |
| 13. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् – | 5 |

| | |
|---|---|
| ➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपचयनम्<br>➢ सर्वनामस्थाने संज्ञाप्रयोगः | |
| 14. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपचयनम्<br>➢ सर्वनामस्थाने संज्ञाप्रयोगः | 5 |
| 15. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपचयनम्<br>➢ सर्वनामस्थाने संज्ञाप्रयोगः | 5 |
| 16. वाक्येषु रेखाङ्कितपदानि अधिकृत्य उचितप्रश्ननिर्माणम् | 4 |
| 17. श्लोकान्वयः/ एकस्य श्लोकस्य संस्कृतेन भावार्थलेखनम् | 3 |
| 18. घटनाक्रमानुसारं कथालेखनम् | 4 |
| 19. (क) प्रसङ्गानुसारम् अर्थलेखनम् | 2 |
| (ख) शब्दानाम् अर्थैः सह मेलनम्<br>(पाठान् आधृत्य लघूत्तरात्मकाः प्रश्नाः) | 2 |

**आहत्याङ्काः - 80**

## परीक्षायै निर्धारिताः पाठाः

| पाठसङ्ख्या | पाठनाम | | पाठसङ्ख्या | पाठनाम |
|---|---|---|---|---|
| प्रथमः पाठः | भारतीवसन्तगीतिः | | सप्तमः पाठः | सिकतासेतुः |
| द्वितीयः पाठः | स्वर्णकाकः | | अष्टमः पाठः | जटायोः शौर्यम् |
| तृतीयः पाठः | गोदोहनम् | | नवमः पाठः | पर्यावरणम् |
| चतुर्थः पाठः | सूक्तिमौक्तिकम् | | दशमः पाठः | वाङ्मनः प्राणस्वरूपम् |
| पञ्चमः पाठः | भ्रान्तो बालः | | | |

**निर्धारित – पाठ्यपुस्तकानि –**

1. 'शेमुषी' प्रथमो भागः, पाठ्यपुस्तकम् , संशोधितसंस्करणम्
   (प्रकाशनम् – रा.शै.अनु.प्र.परि. द्वारा)
2. 'अभ्यासवान् भव'-प्रथमो भागः – व्याकरणपुस्तकम्
   (प्रकाशनम् – रा.शै.अनु.प्र.परि. द्वारा)
3. 'व्याकरणवीथिः'- व्याकरणपुस्तकम्
   (प्रकाशनम् – रा.शै.अनु.प्र.परि. द्वारा)

### अवधेयम् -

* **अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'शेमुषी-प्रथमो भागः इति' पाठ्यपुस्तकात् करणीयम्। यदि ततः न सम्भवति तर्हि 'अभ्यासवान् भव-प्रथमो भागः' इत्यस्मात् चेतुं शक्यते।**

***********************************************

## दशमी

## आन्तरिक-मूल्याङ्कनम् - 20 अङ्काः

<u>उद्देश्यानि</u>

- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ चिन्तनक्षमतायाः आत्मविश्वासस्य च संवर्धनम्।

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1. | **आवधिक-परीक्षाः (पीरियोडिक् - असैस्मैंट)** | लिखितपरीक्षा | 05 | विद्यालयेन समये समये लिखितपरीक्षाणाम् आयोजनं करणीयं भवति। | परीक्षासु यत्र विद्यार्थिनः श्रेष्ठाः अङ्काः स्युः तयोः द्वयोः परीक्षयोः एव अधिभारः ग्रहीतव्यः। अपि च आवधिकपरीक्षासु अपि प्रश्नेषु आन्तरिकविकल्पाः देयाः। मूल्याङ्कनसमये यदि छात्रः सर्वान् प्रश्नान् उत्तरति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः सन्ति तेषाम् एव मूल्याङ्कनं करणीयम्। |
| 2 | **बहुविधमूल्याङ्कनम्** | ❖ कक्षायां पाठितस्य पाठस्य लघुमूल्याङ्कनम्<br>❖ निर्गतपत्राणि<br>❖ प्रश्नोत्तरी<br>❖ मौखिकी परीक्षा<br>❖ प्रतियोगिताः<br>❖ प्रश्नमञ्चस्यायोजनम् | 05 | कक्षायां पाठित-पाठस्य विषयस्य वा बहुविधं मूल्याङ्कनम् अपेक्षितम् अस्ति। अनेन विद्यार्थिनां विविधकौशलानां मूल्याङ्कनं भवेत्। | ❖मौलिकता<br>❖विषयसम्बद्धता<br>❖शुद्धता<br>❖समयबद्धता<br>❖प्रस्तुतीकरणम् |
| 3. | **निवेशसूचिका (पोर्टफोलियो)** | ❖ कक्षाकार्यम्<br>❖ सामूहिक-मूल्याङ्कनम्<br>❖ स्वमूल्याङ्कनम्<br>❖ विद्यार्थिनः विषयगताः उपलब्धयः | 05 | विद्यार्थिभिः कक्षायां कृतानां कार्याणाम् उपलब्धीनां च संरक्षणं संयोजनं च सञ्चिकायां पत्रावल्यां वा करणीयम्। एतेन समग्रं मूल्याङ्कनं प्रमाणिकत्वेन भवितुं शक्नोति। | ❖ सुलेखः<br>❖ तथ्यात्मकता<br>❖ प्रामाणिकता<br>❖ समयबद्धता |

| | | | | | |
|---|---|---|---|---|---|
| 4. | **भाषा-संवर्धनाय गतिविधयः (क) श्रवण-भाषण-कौशलम्** | ❖ कथा<br>❖ संवादः/ वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ता:<br>❖ आशुभाषणम्<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम्<br>(आरोहावरोह-गतियति-प्रयोगः) |
| | **(ख) लेखनकौशलम्** | ❖ विविधविषयान् आधृत्य मौलिकलेखनम् यथा– देशः, माता, पिता, गुरुः, विद्या पर्यावरणम्, योगः, समयस्य सदुपयोगः, शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ भित्तिपत्रिकायाः निर्माणम्।<br>❖ श्रुतलेखः।<br>❖ सूक्तिलेखनम्। | | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ टिप्पणी- पुस्तिकायाः निर्माणम्।<br>❖ वैयक्तिकपरीक्षणम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्यप्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |
| | **अवधातव्यम्** –उपर्युक्त-गतिविधयः उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यगतिविधयः अपि भवितुमर्हन्ति। | | | | |

***************************************